ना इति विवक्ष्यंते। कथं पुनः [illegible] णादिषु जनशब्दप्रयोगः। तत्रेषुवा १४
कथं जनशब्दप्रयोगः समानेषु प्रसिध्यतिक्रमे। वाक्यशेषवशात्रा
पादय एव गृहीतव्या भवंति। जनसंबंधाच्च प्राणादयो जनशब्दसा
जो भवंति। जनवचनपर्यायश्च पुरुषशब्दः प्राणेषु प्रयुक्तः। स्ते वाए
ते पंच ब्रह्मपुरुषा इत्यत्र प्राणो ह पिता प्राणो माते त्यादिश्च ब्राह्मणं
समासबलाच्च समुदायस्य रूढत्वमविरुद्धं कथं पुनरसति प्रथ
मप्रयोगे रूढिः [illegible] शक्या भवितुं शक्योद्भिदादिवदित्याह प्रसि
द्धार्थसन्निधाने ह्यप्रसिद्धार्थः शब्दः प्रयुज्यमा[illegible]नः समभिव्या १९

संख्यामात्रश्रवणे सत्वभूतानां पंचविंशतिः तत्त्वानामुपसंग्रहः
प्रतीयेत जनशब्दस्य तत्त्वेष्वरूढत्वादर्थांतरोपसंग्रहेपि संख्योपप
त्तेः। कथं तर्हि पंचपंचजना इति उच्यते। दिक्संख्ये संज्ञायामिति विशे
षस्मरणात् संज्ञायामेव पंचशब्दस्य जनशब्देन समासस्ततश्च रूढ
त्वाभिप्रायेणैव केचित्पंचजना नाम विवक्ष्यंते। न सांख्यतत्त्वाभिप्रा
येण ते कतीत्यस्यामाकांक्षायां पुनः पंचेति प्रयुज्यते पंचजना नाम के
चित्ते च पंचैवेत्यर्थः। सप्तर्षयः सप्तेति यथा। के पुनस्ते पंचजना नामे
ति तदुच्यते॥ ॥प्राणादयो वाक्यशेषात्॥ ॥यस्मिन्पंचपंचजना
इत्यस्मात् उत्तरास्मिन्मंत्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पंच निर्दि
ष्टाः। प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्या

सू०भा० व म चेत्तत्र चोक्तो दोषस्तस्मात्पंच पंचजना इति न पंचविंशतित प्र०च०पा
त्त्वाभिप्रायमतिरेकाच्च न पंचविंशतितत्त्वाभिप्रायमतिरेको हिभ १ ४
वत्यात्माकाशाभ्यां पंचविंशतिसंख्याया आत्मा तावदिह प्रतिष्ठां
प्रत्याधारत्वेन निर्दिष्टो यस्मिन्निति सप्तमीसूचितस्तमेव
मन्य आत्मानमित्यात्मत्वेनानुकर्षणादात्मा च चेतनः पुरुषः स
च पंचविंशतावंतर्गत एवेति न तस्यैवाधारत्वमाधेयत्वं च युज्य
तेऽर्थांतरपरिग्रहे वा तत्त्वसंख्यातिरेकः सिद्धांतविरुद्धः प्रसज्ये
त तथाकाशस्य प्रतिष्ठित इत्याकाशस्यापि पंचविंशतावंतर्ग
तस्य न पृथगुपादानं न्याय्यमर्थांतरपरिग्रहे चोक्तो दोषः कथं च १२५

ज्ञाशब्दप्रयोगस्य ॥ ॥ न संख्योपसंग्रहादपि नानाभावादति
रेकाच्च ॥ ॥ एवं परिहृतेऽप्यजामंत्रे पुनरन्यस्मान्मंत्रात्सांख्यः प्रत्य
वतिष्ठते । यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः । तमेव मन्य
आत्मानं विद्वान्ब्रह्मामृतोऽमृतमिति यस्मिन्मंत्रे पंच पंचजना इति पं
चसंख्याविषया अपरा पंचसंख्या श्रूयते पंचशब्दद्वयदर्शनात् ॥
त एते पंच पंचकाः पंचविंशतिः संपद्यंते तथा पंचविंशतिसंख्य या च ४
या यावंतः संख्येया आकांक्ष्यंते । तावंत्येव च तत्त्वानि सांख्यैः संख्या
यंते । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इति तया श्रुति

स०ग्रा०प्रसिद्ध या पंचविंशतिसंख्यया तेषां स्मृतिप्रसिद्धानां पंचविंशतित प्र०प०
त्त्वानामुपसंग्रहात्। प्राप्तं पुनः श्रुतिमत्वमेव प्रधानादीनां ततो ब्रूमो १४
न संख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्वं प्रत्याशा कर्त्तव्या। क
स्मात् नानाभावात् नाना ह्येतानि पंचविंशतितत्वानि नैषां पंचशः पंच
शः साधारणो धर्मोस्ति येन पंचविंशतेरंतराले परा पंच पंच संख्या पंच ५
निविशेरन् न ह्येकनिबंधनमंतरेण नानाभूतेषु द्वित्वादिकाः संख्याः
चे३ निविशंते। अथोच्येत पंचविंशतिसंख्यैवेयमवयवद्वारेण ल
क्ष्यते। यथा पंच सप्त च वर्षाणि न ववर्ष शतक्रतुरिति द्वादशवार्षि
कीमनावृष्टिं कथयंति तद्वदिति। तदपि नोपपद्यते। अयमेवास्मिन् १७४

रुयाः पंचसंख्यायापरयाविशेषणं पंचपंचका इति उपसर्जनस्य विशेषणेनासंयोगात् नन्वापन्नपंचसंख्या ५
पक्षे दोषो यल्लक्षणाश्रयणीया स्यात् परश्चात्र पंचशब्दो जनशब्देन
पारि२ समस्तः पंचजना इति पारि[illegible]भाषिकेण स्वरेणैकपदत्वनिश्चयात् प्र
योगांतरे च पंचानां त्वा पंचजनानामित्यैकपद्यैकस्वर्यैकविभक्तित्वावगमा दे३
त् समस्तत्वाच्च। न वीप्सा पंच पंचेति। न पंचकद्वयग्रहणं पंच पंचेति न च पं
चसंख्याका जना एव पुनः पंचसंख्यया विशेष्यमाणाः पंचविंशतिः
प्रत्येष्यंते यथा पंच पंचपूल्य इति पंचविंशतिपूलाः प्रतीयंते तद्वदि
ति ब्रूमो युक्तं यत्पंचपूलीशब्दस्य समाहाराभिप्रायत्वात्कति ता इति स
त्यां भेदाकांक्षायां पंच पंचपूल्य इति विशेषणमिह तु पंचजना इत्या
दित एव भेदोपादानात्कति त इत्यसत्यां भेदाकांक्षायां न पंच पंचजना
इति विशेषणं भवेद्भवदपीदं विशेषणं पंचसंख्याया एव

सं० भा० विदुषा च परित्यज्यत इति। न वेद माशंकितव्यमेकः क्षेत्रज्ञोऽनुशेते प्र० च० प
ऽन्यो जहातीत्यतः क्षेत्रज्ञभेदः पारमार्थिकः परेषामिष्टः प्राप्नो १ ४
तीति। न हीयं क्षेत्रज्ञभेदप्राप्तिर्विपिपादयिषा बंधमोक्षव्यवस्थाप्र
तिपिपादयिषा। त्वेषा प्राप्तं तु भेदमनूद्य बंधमोक्षव्यवस्था प्रति
पाद्यते। भेदस्तूपाधिनिमित्तो मिथ्याज्ञानकल्पितो न पारमार्थिकः
। एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादिश्रुतिभ्यो
मध्वादिवद्यायादित्यस्याऽमधुनो मधुत्वं। वायश्चाधेनोर्धेनुत्वं द्यु
लोकादीनां चानग्नीनां अग्नित्वमिवैवंजातीयकं कल्प्यत एवमि
दं अनात्मन आत्मत्वं कल्पितं स्वरूपः। तस्मादविरोधः स्तत्रोऽन्येषा
१९३

हुतिर

जाकृतिरस्ति । न च तेजोबन्नानां जातिश्च वर्णाद् अजातिनिमित्तो ऽप्यजा
शब्दः संभवतीत्यत उत्तरं पठति ॥ ॥ कल्पनोपदेशाच्च मध्वादि
वदविरोधः ॥ ॥ नायमजाकृतिनिमित्तो ऽजाशब्दो नापि योगिकः
किं तर्हि कल्पनोपदेशो ऽयम् अजारूपकक्लृप्तिस्तेजोबन्नलक्षणा
याश्चराचरयोनेरुपदिश्यते । यथा हि लोके यदृच्छया काचिद्
अजा लोहितशुक्लकृष्णा वर्णा स्याद् बहुबर्करा सरूपबर्करा च तां क
श्चिदजो जुषमाणो ऽनुशयीत कश्चिच्चैनां भुक्तभोगां जह्याद् ए
वमियमपि तेजोबन्नलक्षणा भूतप्रकृतिस्त्रिवर्णा बहुरूपं च
राचरलक्षणं विकारजातं जनयत्यविदुषा च क्षेत्रज्ञेनोपभुज्यते

स्तु० भा० ॥ किंकारणं ब्रह्मेत्युपक्रम्य ते ध्यानयोगानुगता अपश्यंदेवात्मश प्र० चं०
क्तिं स्वगुणैर्निगूढामिति पारमैश्वर्याः शक्तेः समस्तजगद्विधायिन्याः १४
वाक्योपक्रमेवगमाद्वाक्यशेषे मायां तु प्रकृतिं विद्यान्मायिनं तु
महेश्वरमिति। यो योनिं योनिमधितिष्ठत्येक इति च तस्या एवावगमा
न्नस्वतंत्रा काचिदत्र प्रकृतिः प्रधानं नामाजामंत्रेणाम्नायत इति
शक्यते वक्तुं प्रकरणाद्धस्यैव दैवीशक्तिरव्याकृतनामरूपा नामरूप
योः प्रागवस्थानेनापि मंत्रेणाम्नायत इत्युच्यते। तस्याश्च विकार
विषयेणात्रैरूप्येणात्रैरूप्यमुक्तं कथं पुनस्तेजोबन्नात्मनां त्रैरूप्ये
णात्रिरूपाऽजा प्रतिपत्तुं शक्यते। यावतान [illegible] तावत्तेजोबन्नेष्व
१२

दुत्पन्नात्स्फोटितः प्रमुखात्तेजोबन्नलक्षणश्चतुर्विधस्य भूतग्रा
मस्य प्रकृतिभूतेयमजा प्रतिपत्तव्या॥ तुशब्दोवधारणार्थो
भूतत्रयलक्षणैवेयमजा विज्ञेया न गुणत्रयलक्षणा। कस्मात्
तथाह्येके शाखिनः स्तेजोबन्नानां परमेश्वरादुत्पत्तिमाम्नायपू ते४
र्वामेव रोहितादिरूपतामामनंति। यदग्ने रोहितं रूपं तेजसस्तद्रू
पं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति। तान्येवेह तेजोबन्नानि प्र
त्यभिज्ञायंते। रोहितादिशब्दसामान्यात् रोहितादीनां च शब्दानां रूप
विशेषेषु मुख्यत्वात् भाक्तत्वाच्च गुणविषयत्वस्य असंदिग्धेन च
संदिग्धस्य निगमनं न्याय्यं मन्यंते। तथेहापि ब्रह्मवादिनो वदं

स०भा० माश्रयितुं न स्वयं मन्त्रः स्वातन्त्र्येण कांचिदप्यजां समर्थयितुमुत्सहते। प्र०चं०पा
सर्वत्रापि यया कयाचित्कल्पनयाऽजात्वादिसंपादनोपपत्तेः। चमसवा १ ४
दः एवेहाभिप्रेत इति विशेषानवधारणकारणाभावात्‌ संभव यथा हि अर्वा
ग्बिलश्चमस ऊर्ध्वबुध्न इत्यस्मिन्मन्त्रे स्वातन्त्र्येणायं नामासौ च
मसोऽभिप्रेत इति न शक्यते निरूपयितुं सर्वत्रापि यथाकथंचिदर्वा
ग्बिलत्वादिकल्पनोपपत्तेः एवमिहाप्यविशेषोऽजामेकामित्यस्य
मंत्रस्य नास्मिन्मन्त्रे प्रधानमेवाजाभिप्रेतेति शक्यं नियन्तुं तत्र त्वि
दं तच्छिरः एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति वाक्यशेषाच्च
मसविशेषप्रतिपत्तिर्भवति। इह पुनः केयमजा प्रतिपत्तव्येत्य
त्र ब्रूमः॥ ॥ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके॥ ॥ परमेश्वरा १९२

ति। न जायत इति अजा। अजा स्यान्मूलप्रकृतिरविकृतिरित्यभ्युपगमा
न्न च ताशब्दः छागायां रूढः बाढं स्यात्तु रूढिरिह नाश्रयितुं शक्या
विद्याप्रकरणात्। सा च बह्वीः प्रजास्त्रैगुण्यान्विता जनयति तां प्र
कृतिमज एकः पुरुषो जुषमाणः प्रीयमाणः सेवमानो वाऽनुशेते
तामेवाविद्ययात्मत्वेनोपगम्य सुखी दुःखी मूढोऽहमित्यविवेकित
या संसरति। अन्यः पुनरजः पुरुषः उत्पन्नविवेकज्ञानो विरक्तो ज
हात्येनां प्रकृतिं भुक्तभोगां कृतभोगापवर्गां परित्यजति मुच्यत
इत्यर्थः। तस्मात् श्रुतिमूलैव प्रधानादिकल्पना कापिलानामि
त्येवं प्राप्ते ब्रूमः॥ नानेन मन्त्रेण श्रुतिमत्त्वं सांख्यवादस्य शक्य

सां०भा० तंपुरुषंमहांतं इत्येवमादावात्मशब्दप्रयोगात् । दृश्यो हेतुर्यस्तस्याव्य प्र०चं०पा
क्तः शब्दोपि न वैदिके प्रयोगे प्रधानमभिधातुमर्हति । अतश्च ना १ ४
स्यानुमानिकस्य शब्दत्वं ॥ ॥ चमसवदविशेषात् ॥ ॥ पुनरपि प्रधा
नवाच्यशब्दत्वं प्रधानस्यासिद्धमित्याह कस्मान्मंत्रवर्णादिना अजामेकां
लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको
जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इत्यत्राहि मंत्रे लोहित
शुक्लकृष्णशब्दैः रजःसत्वतमांस्यभिधीयंते । लोहितं रंजना
त्मकत्वात् । शुक्लं सत्वं प्रकाशात्मकत्वात् । कृष्णं तमः आवरणात्मक
त्वात्तेषां साम्यावस्थाऽवयवधर्मैर्व्यपदिश्यते लोहितशुक्लकृष्णा

शेषं स्यात्तथैवैतदपि द्रष्टव्यं। ततश्च न जायते म्रियते वेत्येवमाद्य
पि स्वव त्वस्तित्व प्रश्नस्य प्रतिवचनं। सत्तं त्वविद्याकल्पित जीव प्रा
ज्ञस्येदा पक्षपाधो ज्ञापितव्यमेकस्तैपि ह्यासंदिग्धस्य प्रश्नस्य
प्रायणावस्थायां व्यतिरिक्तास्तित्व मात्रविचिकित्सनात्कर्तृत्वादि सं
सारस्याभावानपोहनाच्च पूर्वस्य पर्यायस्य जीवविषयत्वमुत्प्रेक्ष्य
तेनोत्तरस्य तु धर्माद्यन्यप संकीर्त्तनात् प्राज्ञविषयत्वमिति। ततश्च
युक्तान्नि जीवपरमात्मकल्पना प्रधानकल्पनायां तु न वरप्रदानं
न प्रश्नो न प्रतिवचनमिति वैषम्यं॥ ॥महद्वच्च॥ ॥यथायमहच्
छब्दः सांख्यैः सत्तामात्रेपि प्रथमजे प्रयुक्तो न तमेव वैदिकेपि
प्रयोगे सिध्यति। बुद्धेरात्मा महान्परः। महान्तं विभुमात्मानं। वेदाहमे

स०भा०टी० इति अस्यैव प्रश्नस्यैतदनुकर्षणमन्यत्रधर्मादिति । यत्तु प्रश्नच्छा
याः वैलक्षण्यमुक्तं तद्दूषणं तदीयस्यैवाविशेषस्य पुनःप्रक्ष्यमान
त्वात् । तत्र पूर्वत्राह देहादिव्यतिरिक्तस्यात्मनोस्तित्वं पश्चमुत्तरत्र तु त
स्यैवासंसारित्वं पृष्टम् इति । यावद्ध्यविद्या न निवर्तते तावद्धर्मादि
गोचरत्वं जीवस्य जीवत्वं च न निवर्तते तन्निवर्तने न तु प्राज्ञ एव तत्त्व
मसीति श्रुत्या प्रत्याप्यते । न चाविद्यावस्थे तदपगमे च वस्तुनः क
श्चिद्विशेषोस्ति । यथा कश्चित्संतमसे पतितां कांचिद्रज्जुमहिं
मन्यमानो भीतो वेपमानः पलायते तं चापरो ब्रूयात् मा भैषीर्ना
यमहीः रज्जुरेवेति स च तदुपश्रुत्याहिकृतं भयमुत्सृजेद्वेपथुं प
लायनं च न चाहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद्वि १८९

प्र०चं०५।
१ ४

नचिकेतो वतीश्चेत्यारभ्य मृत्युना तैस्तैः कामैः प्रलोभ्यमानोपि नचिके
ता यदा न चचाल। तदेनं मृत्युरभ्युदयनिःश्रेयसविभागप्रदर्शनेन विद्या
विद्याविभागप्रदर्शनेन च विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा
बहवो लोलुपंतेति प्रशंस्य प्रश्नमपि तदीयं प्रशंसन्नुवाच। तं दुर्दर्शं
गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगाधिगमेन दे
वं मत्वा धीरो हर्षशोकौ जहातीति तेनापि जीवप्राज्ञयोरभेद एवेह
विवक्षितः इति गम्यते। यत्प्रश्ननिमित्तां च प्रशंसां महतीं मृत्योः
प्रत्यपद्यत नचिकेताः यदि तं विहाय प्रशंसानंतरमन्यमेव प्रश्नमु
पक्षिपेदस्थान एव सा सर्वा प्रशंसा प्रसारिता स्यात्। तस्माद्येयं प्रेत

स० भा० वति। असंगश्च जन्ममरणयोः शरीरसंस्पर्शा छरीरस्य भवति न प प्र० च० पा
रमात्मनश्चरस्य। तथा स्वप्नांतं जागरितांतं चोभौ येनानुपश्यति। महां १ ४
तं विभुमात्मानं मत्वा धीरो न शोचतीति। स्वप्नजागरितदशो जी
वस्येव महत्त्वविभुत्व[illegible]मात्मानं मत्वा स्वप्नजागरितदशो जीवस्येव
५ त महत्त्वविभु[illegible]विशेषणस्य मननेन शोकविच्छेदं दर्शयन्नप्रा
ज्ञादन्यो जीव इति दर्शयति॥ प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वे
दांतसिद्धांतः। तथा यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृ
त्युमाप्नोति य इह नानेव पश्यतीति जीवप्राज्ञभेददृष्टिमपवद
ति। तथा जीवविषया [illegible] स्ति च नास्ति च प्रश्नस्यानंतरमन्यं वरं १६

तिविचिकित्साभिधानात् जीवश्च धर्मादिगोचरत्वान्नान्यत्र धर्मा
दिति प्रश्नमर्हति प्राज्ञस्तु धर्माद्यतीतत्वादन्यत्र धर्मादिति प्रश्न
मर्हति। प्रश्नच्छाया च न समाना लक्ष्यते। पूर्वस्यास्तित्वनास्तित्व-
विषयत्वादुत्तरस्य धर्माद्यतीतवस्तुविषयत्वात्तस्मात्प्रत्यभिज्ञाना
भावात्प्रश्नभेदेन पूर्वस्योत्तरत्राकर्षणमिति चेन्न। जीवप्राज्ञयो
रेकत्वाभ्युपगमाद्भवेत्प्रश्नभेदात्प्रश्नभेदो यद्यन्यो जीवः प्रा
ज्ञात्स्यात् न त्व न्यत्वमस्ति तत्त्वमसीत्यादिश्रुत्यन्तरेभ्यः। इह
चान्यत्र धर्मादित्यस्य प्रश्नस्य प्रतिवचनं न जायते म्रियते वा
विपश्चिदिति जन्ममरणप्रतिषेधेन प्रतिपाद्यमानं शरीरपर
मेश्वरयोरभेदं दर्शयति। सति हि प्रसंगे प्रतिषेधो भागी भ

॥

स॰ भा॰ त्र वरप्रदानव्यतिरेकेण प्रश्नं कंचिदकल्पयामो वाक्योपक्रमसा | प्र॰ च॰ पा
मर्थ्यात् वरप्रदानोपक्रमा हि मृत्युनचिकेतःसंवादरूपा वाक्यप्र | १ ४
वृत्तिरासमाप्तेः कठवल्लीनां लक्ष्यते मृत्युः किल नचिकेतसे पित्रा
प्रहिताय त्रीन्वरान्प्रददौ। नचिकेताः किल तेषां प्रथमेन वरेण
पितुः सौमनस्यं वव्रे। द्वितीयेनाग्निविद्यां तृतीयेनात्मविद्यां येयं प्रे
त इति वराणामेष वरस्तृतीय इति लिंगात् तत्र यद्यन्यत्र धर्मादित्य
न्योपमपूर्वः प्रश्न उत्थाप्यते ततो वरप्रदानव्यतिरेकेणापि प्र
श्नकल्पनाद्वाक्यं बाध्येत। ननु प्रष्टव्यभेदादपूर्वोयं प्रश्नो भवि
तुमर्हति पूर्वो हि प्रश्नो जीवविषयः येयं प्रेते मनुष्येस्तीति नास्ती

१६१

यं नैवं प्रधानविषयः प्रश्नोऽस्य पक्षत्वाद्यानुपन्यासनायत्त्वं तस्येत्यत्रा
हा। योपमास्य विषयः प्रश्नो येयं प्रेते विचिकित्सा मनुष्य इति किं स ए
वायमन्यत्र धर्मादन्यत्राधर्मादिति पुनरनुकृष्यते किं वा ततोऽन्यो
पमपूर्वः प्रश्न उत्थाप्यत इति किं वा तः स एवायं प्रश्नः पुनरनुकृष्यत इ
ति यद्युच्येत द्वयोरात्मविषययोः प्रश्नयोरेकतापत्तेरग्निविषयः आ
त्मविषयप्रश्न द्वावेव प्रश्नावित्यतो न वक्तव्यं त्रयाणां प्रश्नोपन्यासा
दिति। अथान्योपमपूर्वः प्रश्न उत्थाप्यत इत्युच्येत ततो यथैव वरप्र
दानव्यतिरेकेण प्रश्नकल्पनायामदोषः। एवं प्रश्नव्यतिरेकेणापि
प्रश्नानुपन्यासे कल्पनायामदोषः स्यादिति। अत्रोच्यते नैवं वयमि

स०भा० षयः प्रश्नः। येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके प्रं०च०भा
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरः तृतीय इति जीवविष १ ४
यः। अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादन्यत्र भू
ताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति परमात्मविषयः। अशितवचनमपि
लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वेत्यग्निवि
षयं। हंत त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं। यथा च मरणं प्राप्या
त्मा भवति गौतम। योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः। स्था
णुमन्येऽनुसंयंति यथाकर्म यथाश्रुतमिति वा वह्निं जीवविष
यं। न जायते म्रियते वा विपश्चिदित्यादि बहुप्रपंचं परमात्मविष

स्यात इति सांख्यैरिष्यते। चेतनात्मविज्ञानाद्धि मृत्युमुखात्प्रमुच्य-
त इति तेषामभ्युपगमः। सर्वेषु च वेदान्तेषु प्राज्ञस्यैवात्मनोऽश-
ब्दादिधर्मत्वमभिलप्यते। तस्मान्न प्रधानस्यात्र ज्ञेयत्वमव्य-
क्तशब्दनिर्दिष्टत्वं च॥ ॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च॥
इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा। यस्मात्त्रयाणा-
मेव पदार्थानां अग्निजीवपरमात्मनां अस्मिन्ग्रंथे कठवल्लीषु
वरप्रदानसामर्थ्याद्वक्तव्यतयोपन्यासो दृश्यते। तद्विषय एव
च प्रश्नो नातोन्यस्य प्रश्न उपन्यासो वास्ति तत्र तावत्त्वमग्निं
स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यमित्यग्निवि-

 शब्दादिहीनं प्रधानं महतः परं स्मृतौ निरूपितं तादृशमेव निर्वा
च्यत्वेन निर्दिष्टं। तस्मात्प्रधानमेवेदं तदव्यक्तशब्दनिर्दिष्ट
मित्यत्र ब्रूमो नेह प्रधानं निर्वाच्यत्वेन निर्दिष्टं। प्राज्ञो हीह परमा
त्मा निर्वाच्यत्वेन निर्दिष्ट इति गम्यते। कुतः प्रकरणात्। प्राज्ञस्य
हि प्रकरणं विततं वर्तते। पुरुषान्न परं किंचित्सा काष्ठा सा परा
गतिरित्यादिनिर्देशादेष सर्वेषु भूतेषु गूढोत्मा न प्रकाशत
इति दुर्ज्ञानत्ववचनेन तस्यैव ज्ञेयत्वाकांक्षणात् यच्छेद्वाङ्मनसी प्रा
ज्ञ इति च तद्ज्ञानायैव वागादिसंयमस्य विहितत्वान्मृत्युमुख
प्रमोक्षणफलत्वाच्च। न हि प्रधानमात्रं निर्वाच्यं मृत्युमुखात्प्रमु

त्वेनोच्यते।पदमात्रंच्यव्यक्तशब्दोनेहाव्यक्तंज्ञातव्यंउपासीतवेति
वाक्यमस्ति।नचानुपदिष्टंपदार्थज्ञानंपुरुषार्थमितिशक्यंप्रति
पत्तुं।तस्मादपिनाव्यक्तशब्देनप्रधानमभिधीयते।अस्माकंतु
रथरूपककॢप्तशरीराद्यनुसरणेनविष्णोरेवपरमंपदंदर्श
यितुमयमुपन्यासइत्यनवद्यं॥ ॥वदतीतिचेन्नप्राज्ञोहिप्रक
रणात्॥ ॥अत्राहसांख्योज्ञेयत्वावचनादित्यसिद्धं।कथंश्रूयते
ह्युत्तरत्राव्यक्तशब्दोदितस्यप्रधानस्यज्ञेयत्ववचनमशब्दमस्प
र्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयत्।अनाद्यनंतंमहतः
परंध्रुवंनिचाय्यतन्मृत्युमुखात्प्रमुच्यतइतिअत्रहियादृशं

स०भा० तयाऽसर्वशोधकत्वादग्रहणमिति। यतो नैवेह शोधनं कस्यचिद्विध
धीयते। न चात्र शोधनविधायि किंचिदाख्यातमस्ति। अनंतरनि ब्र० अ० पा० १ ४
र्दिष्टत्वात् किं तद्विष्णोः परमं पदं इतीदं इहविवक्ष्यते। तथाह्यादम
स्मात्परमिदमस्मात्परमित्युक्त्वा पुरुषान्न परं किंचिदित्याह। स
र्वथाप्यानुमानिकनिराकरणोपपत्तेस्तथा नामास्तु न नः किं
चिच्छिद्यते।। ।। ज्ञेयत्वावचनाच्च।। ।। ज्ञेयत्वेन च सांख्यैः प्रधानं
स्मर्यति गुणपुरुषांतरज्ञानात्कैवल्यमिति वदद्भिर्न हि गुणस्वरू
पमज्ञात्वा गुणेभ्यः पुरुषस्यांतरं शक्यं ज्ञातुमिति क्वचिच्च विभू
तिविशेषप्राप्तये प्रधानं ज्ञेयमिति स्मरंति। न चेदमिहाव्यक्तं ज्ञेय १६४

हगृह्यते नपुनः स्थूलमपीति। आम्नातस्यार्थं प्रतिपत्तुं प्रभवामो
नाम्नातं पर्यनुयोक्तुं आम्नातं चाव्यक्तपदं सूक्ष्ममेव प्रतिपादयि
तुं शक्नोति नेतरत् व्यक्तत्वात्तस्येति चेन्नैकवाक्यताधीनत्वादर्थ
प्रतिपत्ते नहीमे पूर्वोत्तरे आम्नाते एकवाक्यतामनापद्य कंचिदर्थं प्र
तिपादयतः॥ प्रकृतहानाप्रकृतप्रक्रियाप्रसंगात् नचाकांक्षामंतरे
णैकवाक्यताप्राप्तिरस्ति। तत्राविशिष्टायां शरीरग्रहणस्याका
ङ्क्षायां। यथाकांक्षं संबंधेऽनभ्युपगम्यमाने एकवाक्यतैव
बाधिता भवति। कुतः आम्नातस्यार्थप्रतिपत्तिः नचैवं मंतव्यं दुः
र्बोधनत्वात्सूक्ष्मस्यैव शरीरस्येह ग्रहणं स्थूलस्य तु दृष्टत्वाभत्स

एवं गृहीतत्वात्परिशिष्टत्वाच्च शरीरस्य। अन्ये तु वर्णयंति
द्विविधं हि शरीरं स्थूलं सूक्ष्मं च। स्थूलं यदिदमुपलभ्यते सू
क्ष्मं च यदुत्तरत्र वक्ष्यते। तदंतरप्रतिपत्तौ रंहति संपरिष्वक्त इ
ति तच्चोभयमपि शरीरमविशेषात्पूर्वत्र रथत्वेन संकीर्तितमि
ह तु सूक्ष्ममव्यक्तशब्देन परिगृह्यते। सूक्ष्मस्याव्यक्तशब्दार्हत्वा
त् तदधीनत्वाच्च। बंधमोक्षव्यवहारस्य जीवात्तस्य परत्वम्। य
थार्थाधीनत्वादिंद्रियव्यापारस्येंद्रियेभ्यः परत्वमर्थानामिति।
तेषां त्वेतद्वक्तव्यं अविशेषेण शरीरद्वयस्य पूर्वत्र रथत्वेन संकीर्ति
तत्वात्समानयोः प्रकृतत्वपरिशिष्टत्वयोः कथं सूक्ष्ममेव शरीरमि

श्रुतेः छायास्मायेति सूचितं। मायां तु प्रकृतिं विद्यान्मायिनं तु म
हेश्वरमिति मंत्रवर्णादव्यक्ता हि सा यातत्त्वान्यत्वनिरूपणास्या
शक्यत्वात्तदिदं महतः परमव्यक्तमित्युक्तमव्यक्तप्रभवत्वान्म
हतो यद्वा हैरण्यगर्भी बुद्धिर्महान्यदा तु जीवो महांस्तदाप्यव्यक्ता
धीनत्वाज्जीवभावस्य महतः परमव्यक्तमित्युक्तं अविद्याया
अव्यक्तमविद्यावत्त्वेन च जीवस्य सर्वः संव्यवहारः संततो वर्त्तते॥
तच्चाव्यक्तगतं महतः परत्वमभेदोपचारात्तद्विकारे शरीरे परि
कल्प्यते। सत्यपि शरीरवदिंद्रियादीनां तद्विकारत्वाविशेषे। श
रीरस्यैवाभेदोपचाराद्व्यक्तशब्देन ग्रहणमिंद्रियादीनां स्वश

वक्ष्या ३

स० गां० ष्टेनाभ्युपगच्छेम प्रसंजयेम तदा प्रधानकारणवादं। परमेश्वरा ब्र०चं०पा
धीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते। न स्वतंत्रा। सा १ ४
चावश्याऽभ्युपगंतव्या अर्थवती हि सा। नहि तया विना परमेश्वरस्य स्र
ष्टृत्वं सिध्यति। शक्तिरहितस्य प्रवृत्तेरनुपपत्तेः मुक्तानां च पुनर
नुत्पत्तिर्विद्यया तस्या बीजशक्तेर्दाहादविद्यात्मिका हि सा। बीज
शक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्ति
र्यस्यां स्वरूपप्रतिबोधरहिताः शेरते। संसारिणो जीवाः सदव्य देत ३
क्तं क्वचिदाकाशशब्दनिर्दिष्टमेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओत
श्च प्रोतश्चेति श्रुतेः। क्वचिदक्षरशब्दोदितमक्षरात्परतः परः इति १६२

ब्दमर्हति। प्रकृतिशब्दश्चविकारे दृष्टः यथा गोभिः श्रीणीत मत्स
रमिति श्रुतिश्च तद्धेदं तर्ह्यव्याकृतमासीदितीदमेव व्याकृतं ना
मरूपविभिन्नं जगत्प्रागवस्थायां परित्यक्तव्याकृतनामरूपं
बीजशक्त्यवस्थं अव्यक्तशब्दयोग्यं दर्शयति।। ।।तदधीनत्वादर्थ
वत्।। ।।अत्राह। यदि जगदिदं अनभिव्यक्तनामरूपबीजात्मकं
प्रागवस्थमव्यक्तशब्दार्हमभ्युपगम्येत। तदात्मना च शरीरस्या
प्यव्यक्तशब्दार्हत्वं प्रतिज्ञायेत। स एव तर्हि प्रधानकारणवाद एवं
सत्यापद्येत। अस्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमा
दित्यत्रोच्यते। यदि वयं स्वतंत्रां कांचित्प्रागवस्थां जगतः कारणं

स्०भा० तं ब्रात्मानं शांत आत्मनि प्रकरणवति परस्मिन्पुरुषे परस्यां का ब्र० चं० पा १ ४
ष्ठायां प्रतिष्ठापयेदिति तदेवं पूर्वापरालोचनायां नास्त्यत्र पर
परिकल्पितस्य प्रधानस्यावकाशः॥ ॥सूक्ष्मं तु तदर्हत्वात्॥
उक्तमेतत्प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधानमिति
इदमिदानीमाशंक्यते। कथमव्यक्तशब्दार्हत्वं शरीरस्य यावता
स्थूलत्वात्स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हमस्पष्टवचनस्त्वव्य
क्तशब्द इति। अत उत्तरमुच्यते। सूक्ष्मं त्विह कारणात्मना शरीरं वि १६१
वक्ष्यते। सूक्ष्मस्याव्यक्तशब्दार्हत्वात् यद्यपि स्थूलमिदं शरीरं
न स्वयमव्यक्तशब्दमर्हति। तस्य त्वारंभकं भूतसूक्ष्ममव्यक्तश

ऐष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यां(या) बुध्या
सूक्ष्मया सूक्ष्मदर्शिभिरिति वैष्णवस्य परमपदस्य दुर्गमत्व रव
मुक्त्वा तदवगमार्थं योगं दर्शयति। यच्छेद्वाङ्मनसी प्राज्ञस्तद्य
च्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छांत
आत्मनीति। एतद्दुर्लभं भवति। तीयं मनसि संयच्छेद्वागादि बाह्ये
न्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत्। मनोपि विषय
विकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां
बुद्धावध्यवसायस्वभावायां धारयेत्तामपि बुद्धिं महत्या
त्म नि सोकृपर्ग्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छे महां

वि

स॰भा॰ तीस्य चाहि रूपमिहोपादिश्यते। तस्याश्चाप्यस्यादीयास्यो बुद्धिभ्यः प प्र॰ च॰ पा॰ १ ४

रत्वोपपत्तेः। एतस्मिंस्तु पक्षे परमात्मविषयेणैव परेणपुरुषग्रह

णेन रथिन आत्मनो ग्रहणं द्रष्टव्यं। परमार्थतः परमात्मविज्ञाना

त्मनोर्भेदाभावात्तदेवं शरीरमेवैकं परिशिष्यते। इतराणीन्द्रियादी

नि प्रकृतान्येव परमपदादिदर्शयिषया समनुक्रामन् परिशिष्य

माणेनेहाव्यक्तशब्देन परिशिष्यमाणं प्रकृतं शरीरं दर्शय

तीति गम्यते। शरीरेंद्रियमनोबुद्धिविषयवेदनासंयुक्तस्य ह्य

विद्यावतो भोक्तुः शरीरादीनां रथादिरूपकल्पनया संसारमो

क्षगतिनिरूपणेन प्रत्यगात्मब्रह्मावगतिरिह विवक्षिता तथा

मनसः परत्वं मनो सूक्ष्मत्वात् विषयेंद्रियव्यवहारस्य। मनसस्तु
परा बुद्धिः बुद्धिं ह्यारुह्य भोग्यजातं भोक्तारमुपसर्पति बुद्धेरात्मा
महान्परोपः स आत्मानं रथिनं विद्धीति रथित्वेनोपक्षिप्त आत्मश
ब्दात्। भोक्तुश्च भोगोपकरणात् परत्वोपपत्ते र्महत्वं चास्य स्वामित्वा
त् उपपन्नमथवा मनो महान्मति र्ब्रह्मा पू र्बुद्धिः ख्याति रीश्वरः॥
प्रज्ञा संवित्चितिश्चैवं स्मृतिश्च परिपठ्यते इति स्मृतेः। यो ब्रह्मा
णं विधोदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति च श्रुते र्याप्र
थमजस्य हिरण्यगर्भस्य बुद्धिः सा सर्वासां बुद्धीनां परा प्रतिष्ठा
सेह महानात्मेत्युच्यते। सा च पूर्वत्र बुद्धिग्रहणेनैव गृहीता स

क०भा० रमात्मेन मध्वनः पारं विष्णोः परमं पदं दर्शयति। इंद्रियेभ्यः परा प्र०च०भा
ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्प १ ४
रः। महतः परमव्यक्तं अव्यक्तात्पुरुषः परः। पुरुषान्नपरं किंचित्सा
काष्ठा सा परा गतिरिति। तत्र य एवेंद्रियाद्यः पूर्वस्यां रथरूपक
ल्पनायां अश्वादिभावेन प्रकृतास्त एवेह परिगृह्यंते। प्रकृत
हाना प्रकृत प्रक्रियापरिहाराय। तत्रेंद्रियमनोबुद्धयः स्तावत्
पूर्वत्रेह च समानशब्दा एव। अर्थाः। ये शब्दादयो विषया इंद्रि
यहयगोचरत्वेन निर्दिष्टास्तेषां चेंद्रियेभ्यः परत्वं इंद्रियाणां ग्र
हत्वं विषयाणामतिग्रहत्वमिति श्रुति प्रसिद्धेर्विषयेभ्यश्च १५८

स्तगृहीतेः।शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृ
ह्यते। कुतः प्रकरणात् परिशेषाच्च तथा ह्यनंतरातीते ग्रंथ आ
त्मशरीरादीनां रथिरथादिरूपकक्लृप्तिं दर्शयति। आत्मानं रथि
नं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमे
व च॥ इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेंद्रियम
वैतन्यंप्रतिष्ठि. नोयुक्तं भोक्तेत्याहुर्मनीषिण इति। तैश्चेंद्रियादिभिरसंयतैः सं
सारमधिगच्छति। संयतैश्चाध्वनः पारं विष्णोः परमं पदमाप्नो
ति। इति दर्शयित्वा किं तदध्वनः पारं विष्णोः परमं पदमित्य
स्यामाकांक्षायां तेभ्य एव प्रकृतेभ्यः इंद्रियादिभ्यः परत्वेन प

सं० भा० रकाठकं वाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरं । नचात्र ब्र० सू० पा० १ ४
यादृशं स्मृतिप्रसिद्धं स्वतंत्रं कारणं त्रिगुणं प्रधानं तादृशं प्रत्यभि
ज्ञायते । शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते सच शब्दो नव्यक्तम
व्यक्तमिति यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे दुर्लक्ष्ये च प्रयुज्यते न
चायं कस्मिंश्चिद्रूढो या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभा
षिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते । नच क्रममा
त्रसामान्यात्समानार्थप्रतिपत्तिर्भवत्यसति तद्रूपप्रत्यभिज्ञाने न ह्य
श्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति । प्रकरणनिरूप १५८
णायां चात्र न परपरिकल्पितं प्रधानं प्रतीयते । शरीररूपकविन्य

ष्टं ब्रह्म जगतः कारणमिति प्रतिपादितमप्याकुलीभवेद तस्ते
षां अन्यपरत्वं दर्शयितुं परः संदर्भः प्रवर्त्तते। आनुमानिकमप्य
नुमाननिरूपितं प्रधानमप्येकेषां शाखिनां शब्दवदुपलभ्यते।
काठके हि पठ्यते। महतः परमव्यक्तमव्यक्तात्पुरुषः पर इति। तत्र
यएव यन्नामानो यत्क्रमाश्च। महदव्यक्तपुरुषाः स्मृतिसिद्धास्त
एवेह प्रत्यभिज्ञायंते। तत्राव्यक्तमिति स्मृतिप्रसिद्धेः। शब्दादिही
नत्वाद्व्यक्तमव्यक्तमिति व्युत्पत्तिसंभवात्। स्मृतिप्रसिद्धं प्रधा
नमभिधायते तस्य शब्दवत्वादशब्दवत्वमनुपपन्नं तदेव च ज
गतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेन्नैतदेवं नत्वेत
अंतः

स० भा० दर्शयिष्यति च ॥ ७ ॥ ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तं । ज ब्र० सू० भा०
न्माद्यस्य यत इति । तल्लक्षणं प्रधानस्यापि समानमित्याशंक्य तद १ ४
शब्दत्वेन निराकृतमीक्षतेर्नाशब्दमिति गतिसामान्यं च वेदांत
वाक्यानां ब्रह्मकारणवादं प्रति विद्यते । न प्रधानकारणवादं प्रती
ति प्रपंचितं गतेन ग्रंथेन इदं त्विदानीमवशिष्टमाशंक्यते यदुक्तं
प्रधानस्याशब्दत्वं तदसिद्धं कासुचिच्छाखासु प्रधानसमर्पणा
भासानां शब्दानां श्रूयमाणत्वादतः प्रधानस्य कारणत्वं वेदसिद्धमे
व महद्भिः परमर्षिभिः कपिलप्रभृतिभिः परिगृहीतमिति प्रस
ज्यते । तद्यावत्तेषां शब्दानां अन्यपरत्वं न प्रतिपाद्यते तावत्सर्वं १५९

इतश्चासंसारिस्वरूपप्रतिपादनपरमेवेतद्वाक्यमित्यवगंतव्यं।
यदस्मिन्वाक्ये पत्यादयः शब्दा असंसारिस्वरूपप्रतिपादनपराः
संसारिस्वभावप्रतिषेधनाश्च भवंति। सर्वस्य वशी सर्वस्येशा
नः सर्वस्याधिपतिः इत्येवंजातीयकाः असंसारिस्वभावप्र
ना तिपादनाः सनसाधुँकर्मणा भूयान्नो एवासाधुना कनीयानित्येवं
जातीयकाः संसारिस्वभावप्रतिषेधनपराः तस्मादसंसारिपरमे
श्वर इहोक्त इत्यवगम्यते॥ ॥ इतिश्रीशारीरकमीमांसाभाष्ये शं
करभगवत्पादकृतौ प्रथमस्याध्यायस्य ततीयः पादः समाप्तः॥
आनुमानिकमप्येकेषामितिचेन्न शरीररूपकविन्यस्तगृहीते